Panchanga paddhati
पञ्चांग पद्धति
Sanskrit
Printed on paper
1949 sambat
Follo : 18
11.3"x4.6"
Complete

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पञ्चाङ्ग पद्धतिः [illegible]

अथपञ्चाङ्गपद्धति प्रारम्भः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पं·प श्रीगणेशायनमः॥ अथपञ्चाङ्गपद्धतिर्लिख्यते धृतकुंकुमकेशरस्यवामंगलतिलकः स्मार्तविधिनाद्वि
१ राचम्य प्राणानायम्य शान्तिपाठंपठित्वात्रिमात्रंप्रणवमुच्चार्य लक्ष्मीनारायणादिदेवान्प्रणमेत् अथशान्तिपा
ठमंत्राः ॐआनोभद्राःक्रतवोयन्तुविश्वतोदब्धासोऽअपरीतासऽउद्भिदः देवानोयथासदमिद्वृधेऽअसन्नप्रायु
वोरक्षितारोदिवेदिवे १ देवानांभद्रासुमतिर्ऋजूयतान्देवानांꣳरातिरभिनोनिवर्त्तताम् देवानांꣳसख्यमुपसेदि
माव्वयन्देवानऽआयुः प्रतिरन्तुजीवसे २ तान्पूर्व्वयानिविदाहूमहेव्वयम्भगम्मित्रमदितिन्दक्षमस्रिधम् अर्य्यमणं
वरुणꣳसोमसश्विनासरस्वतीनः सुभगामयस्करत् ३ तन्नोव्वातोमयोभुवातुभेषजंतन्मातापृथिवीतत्पिताद्योः तद्
ग्रावाणः सोमसुतोमयोभुवस्तदश्विनाशृणुतन्धिष्ण्यायुवम् ४ तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसेहू
महेव्वयम् पूषानोयथाव्वेदसामसद्वृधेरक्षितापायुरदब्धः स्वस्तये ५ स्वस्तिनऽइन्द्रोवृद्धश्रवाः स्वस्तिनः पूषाविश्व
वेदाः स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनोबृहस्पतिर्द्दधातु ६ पृषदश्वामरुतः पृश्निमातरः शुभंयावानो
विदथेषुजग्मयः अग्निजिह्वामनवः सूरचक्षसोविश्वेनोदेवाऽअवसागमन्निह ७ भद्रंकर्णेभिः शृणुयाम रामः
देवाभद्रम्पश्येमाक्षभिर्यजत्राः स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहिदेवहितंयदायुः ८ शतमिन्नुशरदोऽअ १

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न्तिदेवायश्चानश्चकाजुरसेन्तनूनाम् पुत्रासोयत्रपितरोभवन्तिमानोमध्यारीषुतायुर्गन्तोः९ अदितिर्द्यौरदि
तिरन्तरिक्षमदितिर्माता सपिता सपुत्रः। विश्वेदेवाऽअदितिः पञ्चजनाऽअदितिर्जातमदितिर्ज्जनित्वम् १०न्त
म्यन्तोभिरनुगच्छेमदेवाः पुत्रैर्भ्रातृभिरुतवाहिरण्यैः नाकंगृभ्णानाः सुकृतस्यलोकेतृतीयेपृष्ठेऽअधिरोच
नेदिवः ११ आयुष्यंवर्च्चस्यर्ठ॰रायस्पोषमौद्भिदम् इदर्ठ॰हिरण्यंवर्चस्वज्जैत्रायाविशतादुमाम् १२ द्यौः शान्तिर
न्तरिक्षर्ठ॰ शान्तिः पृथिवीशान्तिरापः शान्तिरोषधयः शान्तिः वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः
सर्वर्ठ॰ शान्तिः शान्तिरेवशान्तिः सामाशान्तिरेधि १ यतोयतः समीहसेततोनोऽअभयंकुरु शन्नः कुरुप्रजा
भ्योभयन्नः पशुभ्यः २ सुशान्तिर्भवतु ॐश्रीमन्महागणाधिपतयेनमः ॐलक्ष्मीनारायणाभ्यान्नमः ॐउमा
महेश्वराभ्यान्नमः ॐवाणीहिरण्यगर्भाभ्यांनमः ॐशचीपुरंदराभ्यांनमः ॐमातृपितृचरणकमलेभ्योनमः ॐकु
लदेवताभ्योनमः ॐइष्टदेवताभ्योनमः ॐग्रामदेवताभ्योनमः ॐस्थानदेवताभ्योनमः ॐवास्तुदेवताभ्योनमः
ॐसर्वेभ्योदेवेभ्यः सर्वेभ्योब्राह्मणेभ्योनमोनमः ॐपुण्यंपुण्याहंदीर्घमायुरस्तु सुमुखश्चैकदन्तश्चकपिलोगज
कर्णकः लंबोदरश्चविकटोविघ्ननाशोगणाधिपः धूम्रकेतुर्गणाध्यक्षोभालचन्द्रोगजाननः द्वादशैतानिनामानि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यः पठेच्छृणुयादपि विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा संग्रामे संकटे चैव विघ्नस्तस्य न जायते ३ वक्रतुण्ड
महाकाय सूर्यकोटिसमप्रभ अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ४ शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजं प्रसन्नवद
नं ध्यायेत्सर्वविघ्नोपशांतये ५ अभीप्सितार्थसिध्यर्थं पूजितो यः सुरासुरैः सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ६
सर्वमंगलमांगल्ये शिवे सर्वार्थसाधिके शरण्ये त्र्यंबके गौरि नारायणि नमोस्तु ते ७ सर्वदा सर्वकार्येषु नास्ति तेषा
ममंगलम् येषां हृदिस्थो भगवान्मंगलायतनो हरिः ८ लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः येषामिंदीवर
श्यामो हृदयस्थो जनार्दनः ९ विनायकं गुरुं भानुं ब्रह्मविष्णुमहेश्वरान् सरस्वतीं प्रणम्यादौ सर्वकार्यार्थसिद्धये
१० तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव विद्याबलं दैवबलं तदेव लक्ष्मीपते तेंघ्रियुगं स्मरामि ११ यत्र
योगेश्वरः कृष्णो यत्र पार्थो धनुर्द्धरः तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ११ सर्वेष्वारम्भकार्येषु त्रयस्त्रिभुवने
श्वराः देवा दिशंतु नः सिद्धिं ब्रह्मेशानजनार्दनाः १३ ॐ विष्णुः ३ पुण्यतिथावमुकशर्म्मणः सुतस्य सुताया वा श्वो ऽ
द्यवा ऽमुकसंस्काराख्यं कर्म करिष्ये तदंगत्वेन गणपतिपूजनं स्वस्तिपुण्याहवाचनं मातृकापूजनं वसोर्द्धारा गमः २
आयुष्यजपं नान्दीश्राद्धान्यहं करिष्ये तत्रादौ कर्मार्थं जलपूरितकलशार्चनम् ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्त

अत्र स्वस्तिपुण्याहवाचनमित्यादिसङ्कल्पमुक्तानन्तरादौ निर्विघ्नतासिध्यर्थं गणेशाम्बिकयोः पूजनं करिष्य इत्यप्याचारः ४।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दाशास्तेयजमानोहविर्भिः अहेडमानोवरुणेहवोध्युरुशंस मानः आयुःप्रमोषीः १ कलसेवरुणायनमः गंधाक्ष
तपुष्पैः संपूज्य ततोदक्षिणहस्तेनकलशमालभ्याभिमंत्रयेत् कलशस्यमुखेविष्णुः कंठेरुद्रःसमाश्रितः मूले।
तस्यस्थितोब्रह्मामध्येमातृगणाःस्मृताः कुक्षौतुसागराःसर्वेसप्तद्वीपावसुंधराः ऋग्वेदोथयजुर्वेदःसामवेदोह्य
थर्वणः २ अंगैश्चसहिताःसर्वेकलशन्तुसमाश्रिताः इत्यभिमंत्र्य ततोगंगाद्यावाहनम् गंगेचयमुनेचैवगोदावरि
सरस्वति नर्मदेसिन्धुकावेरिजलेस्मिन्सन्निधिंकुरु १ अस्मिन्कलशे सर्वाणितीर्थान्यावाहयामि पूजयामिनम
स्करोमिकलशोदकेनपूजासंभारान्संप्रोक्ष्य तत्रमंत्रः ॐ अपवित्रः पवित्रोवासर्वावस्थांगतोपिवायःस्मरे।
त्पुण्डरीकाक्षंसबाह्याभ्यंतरेशुचिः १ इतिमंत्रेणाप्रोक्षयेत् दीपपूजनम् भोदीपत्वंब्रह्मरूपस्त्वन्धकारनिवार
कः इमांमयाकृतांपूजांगृह्णंस्तेजःप्रवर्द्धय १ दीपायनमः गंधाक्षतपुष्पैः सम्पूज्य अथगणपतिपूजनं ततो।
ध्यानम् श्वेताङ्गंश्वेतवस्त्रंसितकुसुमगणैः पूजितंश्वेतगन्धैः क्षीराब्धौरत्नदीपैः सुरतरुविमलेरत्नसिंहास
नस्थं दोर्भिः पाशांकुशेष्टाभयधृतिविशदं चन्द्रमौलिंत्रिनेत्रंध्यायेच्छान्त्यर्थमीशंगणपतिममलंश्रीसमेतंप्रसन्नम्
१ ॐ भूर्भुवःस्वःसिद्धिबुद्धिसहितमहागणपतयेनमः ध्यायामि हेहेरंबत्वमेह्येहि अंबिकात्र्यंबकात्मज सिद्धि।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पं·प· बुद्धिपतेस्त्वसल्लसत्लाभपितुःपितः१ नागास्यनागहारत्वंगणराजचतुर्भुजंभूषितःस्वायुधैर्दिव्यैःपाशांकुश
३ परश्वधैः२ आवाहयामिपूजार्थंरक्षार्थंचममक्रतोः इहागत्यगृहाणात्वपूजांक्रतुंचरक्षमे३ ॐगणानान्त्वाग
णपतिंहवामहेप्रियाणान्त्वाप्रियपतिंहवामहेनिधीनांत्वानिधिपतिंहवामहेवसोमम आहमजानिग
र्भधमात्वमजासिगर्भधम्१ ॐभूःसिद्धिबुद्धिसहितमहागणपतयेनमःगणपतिमावाहयामिरम्यंसुशोभनंदि
व्यंसर्वसौख्यकरंशुभम् आसनञ्चमयादत्तंगृहाणपरमेश्वर २ ॐविश्वोस्मिन्समानानामुद्यतामिवसूर्यःइमा
नमभितिष्ठामियोमाकश्चाभिदासति२ ॐभूःसि·म·आसनंसमर्पयामि उष्णोदकन्निर्मलञ्चसर्वसौगन्ध्यसंयु
तम् पादप्रक्षालनार्थायदत्तंतेप्रतिगृह्यताम् ३ ॐएतावानस्यमहिमातोज्यायांश्चपूरुषः पादोस्यविश्वाभू
तानित्रिपादस्यामृतन्दिवि३ ॐभूःसि·म·गा·पाद्यंस· ताम्रपात्रेस्थितंतोयंगंधपुष्पफलान्वितम् सहिरण्यन्ददाम्य
र्घंगृहाणपरमेश्वर४ ॐधामन्तेविश्वम्भुवनमधिश्रितमन्तःसमुद्रेहृद्यन्तरायुषि अपामनीकेसमिथेयऽआभृ
तस्तमश्यामम्मधुमन्तन्तऽऊर्मिम्४ ॐभूःसि·म·अर्घंस·सर्वतीर्थसमायुक्तंसुगन्धिनिर्मलंजलम् आचम्यार्थंम राम:
यादत्तंगृहाणपरमेश्वर५ ॐइमम्मेवरुणश्रुधीहवमद्याचमृडयत्वामवस्युराचके५ ॐभूःसि·म·आचमनं॥ ३

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सम॰ पंचामृतस्नानं कामधेनुसमुद्भूतं सर्वेषां जीवनं परम् पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पितम् १ ॐ पयः
पृथिव्यां पयऽ ओषधीषु पयो दिव्यन्तरिक्षे पयो धाः पयस्वतीः प्रदिशः सन्तु मह्यम् १ ॐ भू॰ सि॰ म॰ पयः स्नानं स॰
पयः स्नानान्ते शुद्धोदकस्नानं स॰ पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभं दध्यानीतं मया देव स्नानार्थं प्रतिगृ
ह्यताम् २ ॐ दधिक्राव्णोऽ अकारिषं जिष्णोरश्वस्य वाजिनः सुरभि नो मुखाकरत्प्रणऽ आयूꣳषि तारिष।
त २ ॐ भू॰ सि॰ म॰ दधिस्नानं तत शुद्धोदकस्नानम् नवनीतसमुत्पन्नं सर्वसंतोषकारकम् घृतं तुभ्यं प्रदास्या
मि स्नानार्थं प्रतिगृह्यताम् ३ ॐ घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम अनुष्वधमावह मादय॰
स्व स्वाहाकृतं वृषभ वक्षि हव्यम् ३ ॐ भू॰ सि॰ म॰ घृतस्नानं स॰ घृतस्नानान्ते शु॰ तरुपुष्पसमुद्भूतं सुस्वा
दु मधुरं मधु तेजः पुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम् ४ ॐ मधुव्वाताऽऋतायते मधुक्षरन्ति सिन्धवः मा
ध्वीर्नः सन्त्वोषधीः १ मधुनक्तमुतोषसो मधुमत्पार्थिवꣳ रजः मधुद्यौरस्तु नः पिता २ मधुमान्नो व्वनस्पतिर्म
धुमाꣳ२ऽ अस्तु सूर्य्यः माध्वीर्गावो भवन्तु नः ३।४ ॐ भू॰ सि॰ म॰ मधुस्नानं स॰ म॰ शु॰ इक्षुसारसमुद्भूता शर्करा पुष्टिकारि
का मलापहारिका दिव्या स्नानार्थं प्रतिगृह्यताम् ५ ॐ अपाꣳ रसमुद्वयसꣳ सूर्य्ये सन्तꣳ समाहितम् अपाꣳ रसस्य यो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पं·प रसस्त्वंछोरगृह्णाम्युत्तममुपयामगृहीतोसीन्द्रायत्वाजुष्टंगृह्णाम्येषतेयोनिरिन्द्रायत्वाजुष्टतमम् ५ ॐ भू· सि·
४ म· शर्करास्नानंस· म· सु· नानासुगंधद्रव्यञ्चचन्दनंरजनीयुतम् उद्वर्तनंमयादत्तंगृहाणपरमेश्वर १ ॐ गन्ध
र्वस्त्वाविश्वावसुःपरिदधातुविश्वस्यारिष्ट्यै यजमानस्यपरिधिरस्यग्निरिडऽईडितः १ ॐ भू· सि· म· उद्वर्तन
स्नानंस· उद्वर्तनस्नानान्तेशुद्धोदकस्नानंस· कावेरीनर्मदावेणीतुंगभद्रासरस्वती॥ गंगाचयमुनातोयंमया
स्नानार्थमर्पितम् १ ॐ आपोहिष्ठामयोभुवस्तानऽऊर्ज्जेदधातन महेरणायचक्षसे १ योवःशिवतमोरसस्तस्य
भाजयतेहनः उशतीरिवमातरः २ तस्माऽअरङ्गमामवोयस्यक्षयायजिन्वथ आपोजनयथाचनः ३ ॐ भू· सि·
म· शुद्धोदकस्नानमभिषेकञ्चस· शान्तिः शान्तिः शान्तिः सुशान्तिर्भवतु ॐ भू· सि· म· स्नानान्ते आचमनंस· स
र्वभूषाधिकेसौम्येलोकलज्जानिवारणे मयोपपादितेतुभ्यंवाससीप्रतिगृह्यताम् १ ॐ युवासुवासाःपरिवीतः
आगात्सऽउश्रेयान्भवति जायमानः तंधीरासःकवयऽउन्नयन्तिस्वाध्योमनसादेवयन्तः २ ॐ भू· सि· म· वस्त्रं
स· नवभिस्तन्तुभिर्युक्तंत्रिगुणंदेवतामयं उपवीतंमयादत्तंगृहाणपरमेश्वर १ ॐ यज्ञोपवीतंपरमंपवित्रंप्रजाप राम
तेर्यत्सहजंपुरस्तात् आयुष्यमग्र्यंप्रतिमुञ्चशुभ्रंयज्ञोपवीतंबलमस्तुतेजः १ ॐ भू· सि· म· यज्ञोपवीतम्· आचमन। ४

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नम् श्रीखण्डचन्दनन्दिव्यंकेशरादिसमन्वितम् विलेपनंसुरश्रेष्ठचन्दनम्प्रतिगृह्यताम् ॐ अꣳशुना तेꣳअ
ꣳशुः पृच्यतांपरुषापरुः गन्धस्तेसोममवतुमदायरसोऽच्युतः १ ॐ भूः सि॰ म॰ चन्दनं स॰ अक्षताश्चसुरश्रेष्ठ
कुंकुमाक्ताः सुशोभिताः मयानिवेदिताभक्त्यागृहाणपरमेश्वर १ ॐ अक्षन्नमीमदन्तह्यवप्रियाऽअधूषत
अस्तोषतस्वभानवोविप्रानविष्ठयामतीयोजान्विन्द्रतेहरि १ ॐ भूः सि॰ म॰ अक्षतान्स॰ सुमाल्यानिसुगंधीनि
मालत्यादीनिवैप्रभो मयाहृतानिपूजार्थंपुष्पाणिप्रतिगृह्यताम् १ ॐ ओषधीः प्रतिमोदध्वम्पुष्पवतीः प्रसूव
रीः अश्वाइवसजित्वरीर्व्वीरुधः पारयिष्णवः १ ॐ भूः सि॰ म॰ पुष्पाणिस॰ दूर्वांकुरान्सुहरितानमृतान्मंगलप्रदान् आ
नीतांस्तवपूजार्थंगृहाणगणनायक १ ॐ काण्डात्काण्डात्प्ररोहन्तीपरुषः परुषस्परि एवानोदूर्व्वेप्रतनुसहस्रे
णशतेनच १ ॐ भूः सि॰ म॰ दूर्वांकुरान्सम॰ हरिद्राकुंकुमंचैवसिंदूरादिसमन्वितम् सौभाग्यद्रव्यसंयुक्तंगृहाण।
परमेश्वर १ सुगन्धौषधिचूर्णंचनानापरिमलानिच नानासुगन्धतैलानि अतः शान्तिंप्रयच्छमे २ ॐ अहि
रिवभोगैः पर्य्येतिवाहुंज्यायाहेतिम्परिबाधमानः हस्तघ्नोविश्वावयुनानिविद्वान्पुमान्पुमाꣳसम्परिपातुवि
श्वतः २ ॐ भूः सि॰ म॰ नानापरिमलद्रव्याणिसमर्पयामि वनस्पतिरसोद्भूतोगंधाढ्योगन्धउत्तमः आघ्रेयः सर्व

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पं·प देवानांधूपोयंप्रतिगृह्यताम् ओंधूरसिधूर्व्वधूर्व्वन्तन्धूर्व्वतंय्योस्मान्धूर्व्वतितन्धूर्व्वयंव्वयन्धूर्व्वामः देवानामसि
५ व्वन्हितमꣳसस्नितमम्पप्रितमञ्जुष्टतमन्देवहूतमम् १ ओंभूःसि·म·धूपंस·साज्यंचवर्त्तिसंयुक्तंवन्हिनायोजि
तंमया दीपंगृहाणदेवेशत्रैलोक्यतिमिरापहम् १ ओंअग्निर्ज्योतिर्ज्योतिरग्निःस्वाहासूर्य्योज्योतिर्ज्योतिः सू
र्य्यःस्वाहा अग्निर्व्वर्चोज्योतिर्व्वर्च्चःस्वाहासूर्य्योवर्च्चोज्योतिर्व्वर्च्चःस्वाहाज्योतिःसूर्य्यःसूर्य्योज्योतिःस्वाहा१ ओंभूःसि·
म·दीपंसमर्पयामि शर्कराघृतसंयुक्तंमधुरंस्वादुचोत्तमम् उपहारसमायुक्तंनैवेद्यंप्रतिगृह्यताम् १ ओंयेदे
वासोदिव्येकादशस्थपृथिव्यामध्येकादशस्थ अप्सुक्षितोमहिनैकादशस्थतेदेवासोयज्ञमिमंजुषध्वम् १ ओं
भूःसि·म·नैवेद्यंस·ओंभूः पानीयंस·ओंभूःउत्तरापोशनंस॰ ओंभूःहस्तप्रक्षालनंसमर्पयामि ओंभूःसि·म·मुख
प्रक्षालनंस·ओंभूःचंदनेनकरोद्वर्त्तनंस· इदंफलंमयादेवस्थापितंपुरतस्तव तेनमेसफलावाप्तिर्भवेज्जन्म
निजन्मनि १ ओंयाःफलिनीर्याऽअफलाऽअपुष्पायाश्चपुष्पिणीः बृहस्पतिप्रसूतास्तानोमुञ्चन्त्वꣳहसः १ ओं
भूःसि·म·फलंस·पूगीफलंमहद्दिव्यंनागवल्लीदलैर्युतम् एलादिचूर्णसंयुक्तंतांबूलंप्रतिगृह्यताम् १ ओंयत्पु राम:
रुषेणहविषादेवायज्ञमतन्वत वसन्तोस्यासीदाज्यं ग्रीष्मऽइध्मःशरद्धविः १ ओंभूःसि·म·ताम्बूलंस·हिरण्य ५

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गर्भगर्भस्थं हेमबीजं विभावसोः अनन्तपुण्यफलदमतः शान्तिम्प्रयच्छमे १ ॐ हिरण्यगर्भः समवर्त्तताग्रे भूत
स्यजातः पतिरेक आसीत् सदाधार पृथ्वीन्द्यामुतेमां कस्मै देवाय हविषा विधेम १ ॐ भूः सि॰ म॰ दक्षिणां स॰ कद
लीगर्भसंभूतं कर्पूरं च प्रदीपितम् आरार्तिकमहं कुर्वे पश्यमे वरदो भव १ ॐ इदꣳ हविः प्रजननम्मेऽ अस्तु दश
वीरꣳ सर्व्वगणꣳ स्वस्तये आत्मसनि प्रजासनि पशुसनि लोकसन्यभयसनि अग्निः प्रजाम्बहुलाम्मे करोत्वन्नम्प
योरेतोऽ अस्मासु धत्त १ ॐ भूः सि॰ म॰ कर्पूरनीराजनं स॰ नानासुगंधपुष्पाणि यथाकालोद्भवानि च पुष्पाञ्जलिर्म
यादत्तो गृहाण परमेश्वर १ ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् तेह नाकम्महिमानः सचन्त
यत्र पूर्वे साध्याः सन्ति देवाः १ ॐ भूः सि॰ म॰ पुष्पाञ्जलिं सः यानि कानि च पापानि ज्ञाताज्ञातकृतानि च तानि सर्वा
णि नश्यन्ति प्रदक्षिणपदे पदे १ ॐ सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः देवायद्यज्ञन्तन्वानाऽ अबध्नन्पुरुषं प
शुम् १ ॐ भूः सि॰ म॰ प्रदक्षिणां स॰ अथ विशेषार्घः रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक भक्तानामभयं कर्ता त्राता भ
व भवार्णवात् १ द्वैमातुर कृपासिंधो षाण्मातुराग्रज प्रभो वरदस्त्वं वरं देहि वांछितं वांछितार्थद २ अनेन सफला
र्घ्येण फलदोस्तु सदा मम ॐ भूः सि॰ म॰ विशेषार्घं सः प्रार्थना विघ्नेश्वराय वरदाय सुरप्रियाय लंबोदराय सकलाय

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

जगद्धिताय नागाननाय श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथ नमो नमस्ते १ भक्तार्तिनाशनपराय गणेश्वराय सर्वे
श्वराय शुभदाय सुरेश्वराय विद्याधराय विकटाय च वामनाय भक्तप्रसन्नवरदाय नमो नमस्ते २ नमस्ते ब्रह्मरू
पाय विष्णुरूपाय ते नमः नमस्ते रुद्ररूपाय करिरूपाय ते नमः ३ विश्वरूपस्वरूपाय नमस्ते ब्रह्मचारिणे भक्तप्रि
याय देवाय नमस्तुभ्यं विनायक ४ लंबोदर नमस्तुभ्यं सततं मोदकप्रिय निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ५
त्वां विघ्नशत्रुदलनेति च सुन्दरेति भक्तप्रियेति सुखदेति वरप्रदेति विद्याप्रदेत्यघहरेति च ये स्तुवंति तेभ्यो गणेश व
रदो भव नित्यमेव ६ अनया पूजया सिद्धिबुद्धिसहितमहागणपतिः सांगः सपरिवारः प्रीयताम् अथ पुण्याह
वाचनप्रयोगः मही द्यौरिति भूमिस्पर्शः ॐ मही द्यौः पृथिवी च नऽ इमं यज्ञं मिमिक्षताम् पिपृतान्नो भरीमभिः १ ओष
धयः समिति यवान्क्षिप्त्वा ॐ ओषधयः समवदन्त सोमेन सह राज्ञा॥ यस्मै कृणोति ब्राह्मणस्तꣳ राजन्पारयामसि १ आ
जिघ्रमिति कलशं स्थापयेत् ॐ आजिघ्र कलशं मह्या त्वा विशन्त्विन्दवः पुनरूर्जा निवर्तस्व सा नः सहस्रं धुक्ष्वोरुधा
रा पयस्वती पुनर्मा विशताद्रयिः १ वरुणस्योत्तंभनमिति जलं पूरयेत् ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भ
सर्ज्जनी स्थो वरुणस्यऽ ऋतसदन्यसि वरुणस्यऽ ऋतसदनमसि वरुणस्यऽ ऋतसदनमासीद १ अꣳ शुना न इ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तिगन्धंप्रक्षिपेत् ॐअᳫंशुनातेऽअᳫंशुः पृच्यतांपरुषापरुः गन्धस्ते सोममवतुमदायरसोऽअच्युतः १ या॥
ओषधीरितिसर्वौषधीः याऽओषधीः पूर्वाजातादेवेभ्यस्त्रियुगम्पुरा मनैनुबभ्रूणामहᳫं शतन्धामानिसप्तच १॥
काण्डात्काण्डादितिदूर्वाः ॐकाण्डात्काण्डात्प्ररोहन्ती १ अश्वत्थेवेतिपञ्चपल्लवान् ॐअश्वत्थेवोनिषदनम्पर्णे
वोवसतिष्कृता गोभाजइत्किलासथयत्सनवथपूरुषम् १ स्योनापृथिवीतिसप्तमृदः ॐस्योनापृथिविनोभवान्न
क्षरानिवेशनी यच्छानःशर्मसप्रथाः १ याःफलिनीरितिफलम् ॐयाःफलिनीर्याऽअफला १ परिवाजपतिरि
पंचरत्नानि ॐपरिवाजपतिःकविरग्निर्हव्यान्यक्रमीत् दधद्रत्नानिदाशुषे १ हिरण्यगर्भइतिहिरण्यम् ॐहिर
ण्यगर्भःसम १ युवासुवासाइतिरक्तसूत्रेणावेष्टयेत् ॐयुवासुवासाःपरि पूर्णादर्वीतिपूर्णपात्रमुपरिन्यसेत्।
ॐपूर्णादर्विपरापतसुपूर्णापुनरापत वस्नेवविक्रीणावहाऽइषमूर्जᳫं शतक्रतो १ तत्त्वायामीतिवरुणमावाह्य
ॐतत्त्वायामिब्रह्मणावन्दमानस्तदाशास्तेयजमानोहविर्भिः अहेडमानोवरुणेहबोध्युरुशᳫं समानऽआयुःप्रमो
षीः १ वरुणंसाङ्गंसपरिवारंआवाहयामि मनोजूतिरितिप्रतिष्ठाप्य ॐभूर्भुवःस्वः अपांपतिवरुणायनमइतिमंत्रेणषो
डशोपचारैःसम्पूजयेत् ततोगंगाद्यावाहनम् सर्वेसमुद्राःसरितस्तीर्थानिजलदानदाःआयान्तुममशान्त्यर्थंदुरित

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्वयकारकाः ततः कलशाभिमंत्रणम् कलशस्यमुखेविष्णुः कंठेरुद्रः समाश्रितः मूलेतस्यस्थितोब्रह्मामध्ये
मातृगणाः स्मृताः १ कुक्षौतुसागराः सप्तसप्तद्वीपावसुंधरा ऋग्वेदोथयजुर्वेदः सामवेदोह्यथर्वणः अंगैश्च
सहिताः सर्वेकलशन्तुसमाश्रिताः २ प्रार्थना देवदानवसंवादेमथ्यमानेमहोदधौ उत्पन्नोसितदाकुंभविधृ
तोविष्णुनास्वयम् १ त्वत्तोयेसर्वतीर्थानिदेवाः सर्वेत्वयिस्थिताः। त्वयितिष्ठन्तिभूतानित्वयिप्राणाः प्रतिष्ठिताः २
शिवः स्वयंत्वमेवासिविष्णुस्त्वंचप्रजापतिः आदित्यावसवोरुद्राविश्वेदेवाः सपैतृकाः त्वयितिष्ठंतिसर्वेपियतः का
मफलप्रदाः त्वत्प्रसादादिमंयज्ञंकर्त्तुमीहेजलोद्भव ४ सान्निध्यंकुरुमेदेवप्रसन्नोभवसर्वदा ५ नमोनमस्तेस्फटिक
प्रभायसुश्वेतहारायसुमंगलाय सुपाशहस्तायझषासनायजलाधिनाथायनमोनमस्ते १ पाशपाणेनमस्तुभ्यंपद्मि
नीजीवनायक पुण्याहवाचनंयावत्तावत्वंसन्निधोभव १ इतिप्रार्थना अथपुण्याहवाचनम् अवनीकृतजानुमंडलः
कमलमुकुलसदृशमंजलिंशिरस्याधायानन्तरंदक्षिणेनपाणिनास्वर्णपूर्णकलशंधारयित्वा दीर्घानागानद्योगिरयः
स्त्रीणिविष्णुपदानिच ॐत्रीणिपदाविचक्रमेविष्णुर्गोपा अदाभ्यः अतोधर्माणिधारयन् १ तेनायुः प्रमाणेनपुण्यं
पुण्याहंदीर्घमायुरस्त्विति भवन्तोब्रुवन्तु इति यजमानः पुण्यंपुण्याहंदीर्घमायुरस्त्विति द्विजाः एवंसर्वत्रयजमानवचनो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अत्रगन्धापान्त्वितियजमानःसुमङ्गल्यञ्चास्त्वितिविप्राइत्यपिकेचित्तत्रमूलम्मृग्यम् ४॥

ततंब्राह्मणाः प्रतिवचनंदद्युःब्राह्मणानांहस्तेषुप्रोक्षितमस्तु अपाम्मध्येस्थितादेवाःसर्वमप्सुप्रतिष्ठिताःब्राह्मणानां
करेन्यस्ताशिवाआपोभवन्तुते १ शिवाआपःसन्तु ॥ ॐसन्तुशिवाआपः लक्ष्मीर्वसतिपुष्पेषुलक्ष्मीर्वसतिपुष्करेसा
मेवसतुवैनित्यंसौमनस्यन्तथास्तुनः १ सौमनस्यमस्तु अस्तुसौमनस्यम् अक्षतंचास्तुमेपुण्यंदीर्घमायुर्यशोव
लम् यद्यच्छ्रेयस्करंलोकेतत्तदस्तुसदामम १ अक्षतंचारिष्टंचास्तु अस्त्वक्षतमरिष्टंच गन्धाःपांतुसुमंगल्यंचास्त्वि
तिभवन्तोब्रुवन्तु ॐगंधाःपान्तुसुमंगल्यञ्चास्तु एवंसर्वत्र अक्षताःपान्तु आयुष्यमस्त्वि· ॐ अक्षताःपान्तु आयुष्यम
स्तु·पुष्पाणिपान्तुसौश्रियमस्त्वि· ॐपुष्पाणिपान्तुसौश्रियमस्तुतांबूलानिपांतु ऐश्वर्यमस्त्वि· ॐतांम्बूलानिपांतु ऐ
श्वर्यमस्तुदक्षिणाःपांतुवहुधनमस्त्वि· ॐदक्षिणाःपांतुबहुधनमस्तुपुनरर्घ्याःपांतुस्वर्चितमस्त्वि·पुनरर्घ्याःपा
न्तुस्वर्चितमस्तु यजमान आचार्यादीन्प्रणम्यश्रीर्यशोविद्याविनयोवित्तंवहुपुत्रंचायुष्यंचास्त्वितिभवन्तोब्रुवन्तु
इतिवदेत् तेचश्रीर्यशोविद्याविनयोवित्तंवहुपुत्रंचायुष्यंचास्तुइत्युक्त्वादीर्घमायुःशान्तिःपुष्टिस्तुष्टिश्चास्त्वितिय
जमानंभूर्ध्न्यभिषिंचेयुः यंकृत्वासर्ववेदयज्ञक्रियाकरणकर्मारंभाःशुभाःशोभनाःप्रवर्तन्ते तमहमोंकारमादिंकृत्वाय
जुराशीर्वचनंवहुऋषिमतंसमनुज्ञातंभवद्भिरनुज्ञातःपुण्यंपुण्याहंवाचयिष्येवाच्यताम् ब्राह्मणानांहस्ते अक्षता

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पं॰प॰ न्द्यात् ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेमहि देवहितं यदा
८ युः १ द्रविणोदाः पिपीषति जुहोत प्र च तिष्ठत नेष्ट्रादृतुभिरिष्यत २ सविता त्वा सवानाꣳसुवतामग्निर्गृहपतीनाꣳसोमो व
नस्पतीनाम् बृहस्पतिर्वाच इन्द्रो ज्यैष्ठ्याय रुद्रः पशुभ्यो मित्रः सत्यो वरुणो धर्मपतीनाम् ३ न तद्रक्षाꣳसि न पिशाचा।
स्तरन्ति देवानामोजः प्रथमजꣳह्येतत् यो बिभर्ति दाक्षायणꣳहिरण्यꣳस देवेषु कृणुते दीर्घमायुः स मनुष्येषु कृणुते
दीर्घमायुः ४ उच्चाते जातमन्धसो दिवि सद्भूम्याददे उग्रꣳशर्म महि श्रवः ५ उपास्मै गायता नरः पवमानायेन्दवे अभि दे
वाँ इयक्षते ६ इत्याशीर्वादः व्रतजपनियमतपःस्वाध्यायक्रतुदयादमदानविशिष्टानां सर्वेषां ब्राह्मणानां मनः समाधीयता
नाम् इति यजमानः समाहितमनसः स्मः इति द्विजाः प्रसीदन्तु भवन्तः इति यजमानो ब्रूयात् प्रसन्नाः स्मः इति द्विजा ब्रूयुः ततो य
जमानो ब्रूयात् ॐ शान्तिरस्तु अस्त्विति द्विजाः प्रतिवचनं सर्वत्र दद्युः ॐ पुष्टिरस्तु ॐ तुष्टिरस्तु ॐ वृद्धिरस्तु ॐ अविघ्नमस्तु
ॐ आयुष्यमस्तु ॐ आरोग्यमस्तु शिवं कर्मास्तु ॐ कर्मसमृद्धिरस्तु ॐ वेदसमृद्धिरस्तु ॐ शास्त्रसमृद्धिरस्तु ॐ धनधान्य।
समृद्धिरस्तु ॐ पुत्रपौत्रसमृद्धिरस्तु ॐ इष्टसंपदस्तु ॐ अरिष्टनिरसनमस्तु १५ ॐ यत्पापं रोगमशुभमकल्याणं त। राम
द्दूरे प्रतिहतमस्तु ॐ यच्छ्रेयस्तदस्तु ॐ उत्तरे कर्मणि निर्विघ्नमस्तु ॐ उत्तरोत्तरमहरहरभिवृद्धिरस्तु ॐ उत्तरोत्तराः क्रियाः ८

॥५॥ अत्र यजमानोऽशक्तश्चेद्यजमानस्य गृहे शान्तिरस्त्वित्यादि विप्रा एव पठेयुस्तत्र प्रतिवचनं नास्ति।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शुभाः शोभनाः संपद्यन्ताम् ॐ तिथिकरणमुहूर्तनक्षत्रग्रहलग्नसंपदस्तु उदकः ॐ तिथिकरणमुहूर्तनक्षत्रग्रहलग्ना
धिदेवताः प्रीयन्ताम् ॐ तिथिकरणे समुहूर्ते सनक्षत्रे सग्रहे साधिदेवते प्रीयेतां ॐ दुर्गापांचाल्यौ प्रीयेतां ॐ अग्नि
पुरोगा विश्वेदेवाः प्रीयंताम् ॐ इन्द्रपुरोगा मरुद्गणाः प्रीयंताम् ॐ माहेश्वरीपुरोगा उमामातरः प्रीयन्तां ॐ अरुं
धतीपुरोगा एकपत्न्यः प्रीयन्ताम् ॐ विष्णुपुरोगाः सर्वे देवाः प्रीयन्ताम् ॐ ब्रह्मपुरोगाः सर्वे वेदाः प्रीयन्ताम् ॐ ब्र
ह्म च ब्राह्मणाश्च प्रीयन्ताम् ॐ श्रीसरस्वत्यौ प्रीयेताम् ॐ श्रद्धामेधे प्रीयेताम् ॐ भगवती कात्यायनी प्रीयताम् ॐ भगव
ती माहेश्वरी प्रीयताम् ॐ भगवती ऋद्धिकरी प्रीयतां ॐ भगवती सिद्धिकरी प्रीयताम् ॐ भगवती पुष्टिकरी प्रीयताम् ॐ
भगवती तुष्टिकरी प्रीयताम् ॐ भगवन्तौ विघ्नविनायकौ प्रीयेताम् ॐ सर्वाः कुलदेवताः प्रीयन्ताम् ॐ सर्वा ग्रामदेवताः
प्रीयन्तां २१ ॐ हताश्च ब्रह्मद्विषः ॐ हताश्च परिपंथिनः ॐ हताश्च विघ्नकर्तारः शत्रवः पराभवं यान्तु ॐ शाम्यंतु घोरा
णि ॐ शाम्यंतु पापानि ॐ शाम्यन्त्वीतयः ६ ॐ शुभानि वर्द्धन्ताम् ॐ शिवा आपः सन्तु ॐ शिवा ऋतवः सन्तु ॐ शिवा ओषधयः
संतु ॐ शिवा नद्यः सन्तु ॐ शिवा गिरयः सन्तु ॐ शिवा अतिथयः सन्तु ॐ शिवा अग्नयः सन्तु ॥ ॐ शिवा आहुतयः सन्तु ॥ ॐ
अहोरात्रे शिवे स्याताम् ॐ निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् १ ॐ

वहिर्देशे ४॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सं·प
९

शुक्रांगारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहित आदित्यपुरोगाः सर्वेग्रहाः प्रीयन्ताम् ओंभगवान्नारायणः
प्रीयताम् ओंभगवान्पर्जन्यः प्रीयताम् ओंभगवान्स्वामीमहासेनः सपत्निकः ससुतः सपार्षदः सर्वस्थागतः प्रीय
ताम् ओंपुण्याहकालान्वाचयिष्ये इतियजमानः ओंवाच्यताम् इतिवचनम् ब्राह्मंपुण्यमहर्यच्च सृष्ट्युत्पादन
कारकम् वेदवृक्षोद्भवंनित्यंतत्पुण्याहंब्रुवन्तुनः १ भोब्राह्मणाः ममसकुटुम्बस्यसपरिवारस्यगृहे अमुककर्मणः
पुण्याहम्भवन्तोब्रुवन्तु पुण्याहम् एवंवचनंप्रतिवचनंत्रिः पठित्वा ओंपुनन्तुमादेवजनाः पुनन्तुमनसाधियः
पुनन्तुविश्वाभूतानिजातवेदः पुनीहिमा १ पृथिव्यामुद्धृतायान्तुयत्कल्याणंपुराकृतंऋषिभिः सिद्धगन्धर्वैस्तत्क
ल्याणंब्रुवन्तुनः भोब्राह्मणाममसकुटुम्बस्यसपरिवारस्यगृहेअमु कर्मणः कल्याणम्भ कल्याणम् ३ ओंयथेमांवा
चंकल्याणीमावदानिजनेभ्यः ब्रह्मराजन्याभ्यां शूद्रायचार्यायचस्वायचारणायच प्रियोदेवानांदक्षिणायैदा
तुरिहभूयासमयम्मेकामः समृद्ध्यतामुपमादोनमतु २ सागरस्यतुयाऋद्धिर्महालक्ष्म्यादिभिः कृतासम्पूर्णासुप्रभावाच
तांचऋद्धिंब्रुवन्तुनः भोब्रा· मम ऋ· भ· ऋद्ध्यताम् ३ ओंसत्रस्यऽऋद्धिरस्यगन्मज्योतिरमृताऽअभूम दिवम्पृथिव्याऽ रामः
अध्यारुहामाविदामदेवान्स्वर्ज्योतिः ३ स्वस्तिस्तुयाऽविनाशाख्यापुण्यकल्याणवृद्धिदा विनायकप्रियानित्यन्ताञ्च ९

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्वस्तिं ब्रुवन्तु नः भो ब्राह्मणा मम स्व॰ ब्रु॰ आयुष्मते स्वस्तिः ३ ॐ स्वस्ति नऽ इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः
स्वस्ति नस्तार्क्ष्योऽ अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ४ समुद्रमथनाज्जाता जगदानन्दकारिका हरिप्रिया च
मांगल्या तां श्रियं ब्रुवन्तु नः भो मम श्रियमभ॰ अस्तु श्रीः ३ श्रीश्च ते लक्ष्मीरिति ५ मृकण्डसूनोरायुर्यद्ध्रुवलो
मशयोस्तथा॥ आयुषा तेन संयुक्ता जीवेम शरदः शतम् शतञ्जीवन्तु भवन्तः १ ॐ शतमिन्नु शरदोऽ अन्ति देवा
यत्रा नश्चक्रा जरसन्तनूनाम् पुत्रासो यत्र पितरो भवन्ति मा नो मध्यारीरिषतायुर्गन्तोः ६ शिवगौरीविवाहे या या श्री
रामे नृपात्मजे धनदस्य गृहे या श्रीरस्माकं सास्तु सद्मनि अस्तु श्रीः ३ मनसः काममाकूतिं वाचः सत्यमशीय प
शूनां रूपमन्नस्य रसो यशः श्रीः श्रयतां मयि स्वाहा ७ प्रजापतिर्लोकपालो धाता ब्रह्मा च देवराट् भगवाञ्छा
श्वतो नित्यं स नो रक्षतु सर्वतः भगवान्प्रजापतिः प्रीयताम् ॐ प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परिता ब
भूव यत्कामास्ते जुहुमस्तन्नोऽ अस्त्वयममुष्य पितासावस्य पिता वयं स्याम पतयो रयीणाम् ८ आयुष्मते स्व
स्तिमते यजमानाय दाशुषे श्रिये दत्ताशिषः सन्तु ऋत्विग्भिर्वेदपारगैः देवेन्द्रस्य यथा स्वस्ति यथा स्वस्तिर्गुरो
र्गृहे एकलिंगे यथा स्वस्ति तथा स्वस्तिः सदा मम आयुष्मते स्वस्तिः ३ ॐ प्रतिपन्थामपद्महि स्वस्तिगामनेहस

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पं.प. म् येन विघ्नाः परिहृष्टो वृणक्ति विन्दते वसु ९ अस्मिन्पुण्याहवाचने न्यूनातिरिक्तो यो विधिः स उपविष्टब्राह्म
१० णानां वचनात् श्रीमन्महागणपतिप्रसादात्परिपूर्णोस्त्विति भवंतो ब्रुवन्तु अस्तु परिपूर्णः अनेन पुण्याहवाच
नेन प्रजापतिः प्रीयताम् ततोऽभिषेकः अभिषेके पत्नी वामतः उपविशेत् कलशोदकं गृहीत्वा चत्वारो ब्रा
ह्मणा दूर्वाम्रपल्लवैर्यजमानमभिषिंचेयुः तत्र मंत्राः ॐ पयः पृथिव्यां १ ॐ पञ्चनद्यः सरस्वतीमपि यन्ति सस्रो
तसः सरस्वती तु पञ्चधा सो देशे भवत्सरित् २ वरुणस्योत्तं ३ पुनन्तु मा देवजनाः पु ४ देवस्य त्वा सवितुः प्रसवेऽश्विनो
र्बाहुभ्यां पूष्णो हस्ताभ्याम् सरस्वत्यै वाचो यन्तुर्यन्त्रिये दधामि बृहस्पते ष्ट्वा साम्राज्येनाभिषिञ्चाम्यसौ ६ देवस्य
त्वा सरस्वत्यै वाचो यन्तुर्यन्त्रेणाग्नेः साम्राज्येनाभिषिञ्चामि ७ देवस्य त्वा अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसा
याभिषिञ्चामि सरस्वत्यै भैषज्येन वीर्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेण बलाय श्रियै यशसेभिषिञ्चामि ८ वि
श्वानि देव सवितर्दुरितानि परासुव यद्भद्रं तन्न आसुव ९ धामच्छदग्निरिन्द्रो ब्रह्मा देवो बृहस्पतिः सचेतसो विश्वे
देवा यज्ञं प्रावन्तु नः शुभे १० त्वं यविष्ठ दाशुषो नॄः पाहि शृणुधी गिरः रक्षा तोकमुत त्मना ११ अन्नपतेन्नस्य नो धेह्य राम:
नमीवस्य शुष्मिणः प्रप्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे १२ द्यौः शान्तिरन्त १३ यतो यतः समीहसे १४ सु १०

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः १ प्रद्युम्नश्चानिरुद्धश्च भवन्तु
विभवायते आखण्डलोग्निर्भगवान्यमो वै निर्ऋतिस्तथा २ वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ब्रह्मणा
सहितास्सर्वे दिक्पालाः पान्तु वः सदा ३ कीर्तिर्लक्ष्मीर्धृतिर्मेधा श्रद्धा पुष्टिः क्रिया मतिः बुद्धिर्लज्जा वपुः शान्तिर्मायानि
द्रा च भावना ४ एतास्त्वामभिषिञ्चंतु समाकान्तीतथैव च आदित्यश्चन्द्रमा भौमो बुधो जीवो सितोऽर्कजः ५ ग्रहा
स्त्वामभिषिञ्चन्तु राहुः केतुश्च पूजिताः देवदानवगंधर्वा यक्षराक्षसपन्नगाः ६ ऋषयो मनवो गावो देवमात
र एव च देवपत्न्यो ध्रुवो नागा दैत्याश्चाप्सरसां गणाः ७ अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च औषधय
श्च रत्नानि कालस्यावयवाश्च ये ८ सरितः सागराः शैलास्तीर्थानि जलदा नदाः एतास्त्वामभिषिञ्चन्तु सर्वकामा
र्थसिद्धये ९ अमृताभिषेकोऽस्तु शान्तिः शान्तिः शान्तिः सुशान्तिर्भवतु ततः पुत्रवतीभिर्वृद्धसुवासिनीराजनं कार्य
म् ॐ अनाधृष्टा पुरस्तादग्नेराधिपत्यऽआयुर्मे दाः पुत्रवती दक्षिणतऽइन्द्रस्याधिपत्ये प्रजां मे दाः सुखदा पश्चा
द्देवस्य सवितुराधिपत्ये चक्षुर्मे दाऽआश्रुतिरुत्तरतो धातुराधिपत्ये रायस्पोषम्मे दाः विधृतिरुपरिष्टाद्बृहस्पतेराधिप
त्यऽओजो मे दा विश्वाभ्यो मा राष्ट्राभ्यस्पाहि मनोरश्वासि १ इति मंत्रेण अथ मातृकापूजनम् तत्रायं क्रमः अविघ्नोम्

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अस्मत्संप्रदाये नाचरणात्प्रयोगो नात्र लिखितः ॥

षडपश्चैव मातृणां पूजनं सकृत् वैश्वदेवं वसोर्द्धारा नान्दीश्राद्धमतः परम्॥१ अविघ्नपूजनात्पूर्वं वैश्वदेवं विधाय च
ततो गोधूमादिधान्यपूरिते हरिद्रादिरंजिते मृन्मये अविघ्नसंज्ञके कलशे मोदादिषड्विनायकमातृणां प्रतिमाः कुंकु
मेन लिखित्वा आवाहयेत् तद्यथा मोदश्चैव प्रमोदश्च सुमुखो दुर्मुखस्तथा अविघ्नो विघ्नकर्ता च षडेते ---------
विघ्ननायकाः॥१ ॐ मोदाय नमः मोदमावाहयामि ॐ प्रमोदाय प्रमोदमा· २ ॐ सुमुखाय सुमुखमा· ३ ॐ दुर्मुखाय दुर्मुखमा·
४ ॐ अविघ्नाय अविघ्नमा· ५ ॐ विघ्नकर्त्रे विघ्नकर्तारमा· ६ मनोजूतिरिति प्रतिष्ठाप्य षोडशोपचारैः संपूजयेत् ॐ भूर्भु
वः स्वः मोदादिषड्विनायकाः सुप्रतिष्ठिता वरदा भवन्तु ॐ मोदादिषड्विनायकेभ्यो नमः इति नाममंत्रेण आवाहनादि पुष्पांज
लिपर्यन्तं पूजनं कार्यम् अनया पूजया मोदादिषड्विनायकाः प्रीयन्ताम् ततः स्तंभरोपणादिकयवरणाद्वारफल
कान्तं संपादितमण्डपे मण्डपमातृकाः स्थापयेदिन्येके ततः आचार्यहस्तेषु प्रोक्षितादिकं कार्यम् अत्राः पान्तु सुप्रो
क्षितमस्त्विति भवन्तो ब्रुवन्तु ॐ अत्राः पान्तु प्रोक्षितमस्तु गंधाः पान्तु सुमंगल्यं चास्त्विति भ· ॐ गन्धाः पान्तु सुमंगल्य
ञ्चास्तु अक्षताः पान्तु आयुष्यमस्त्विति भ· ॐ अक्षताः पान्तु आयुष्यमस्तु पुष्पाणि पान्तु सौश्रियमस्त्विति भ· ॐ पुष्पाणि
पान्तु सौश्रियमस्तु तांबूलानि पान्तु ऐश्वर्यमस्त्विति भ· ॐ तांबूलानि पान्तु ऐश्वर्यमस्तु दक्षिणाः पान्तु बहुधनमस्त्विति।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अहिरिवभोगैः पर्य्येति बाहुं ज्याया हेतिम्परिबाधमानः हस्तघ्नो विश्वा वयुनानि विद्वान्पुमान्पुमांसम्परिपातु विश्वतः ६॥

भ॰ ॐ दक्षिणाः पान्तु बहु धनमस्तु अपूपाः पान्तु बहून्न ऋद्धास्त्विभ॰ ॐ अपूपाः पान्तु बहून्नं चास्तु शाखा दूर्वाः पान्तु वृद्धिरस्त्विति भ॰ ॐ शाखा दूर्वाः पान्तु शाखापल्लवानां वृद्धिश्चास्तु तत आचार्येण दूर्वा शम्या म्यादि प्रशस्त वृक्षस पत्राणां रक्तसूत्रेण पञ्चधा वेष्टनं कार्यम् आसां मंडपमातृसंज्ञाना श्च मंडपमातृर्मण्डपे वा वंशपात्रे स्थापयित्वा व सोः पवित्रमिति मंत्रेण यजमानपत्न्या शाखासु तैलारोपणं कार्यम् ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम् देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः १ अहिरिव भोगैरिति शाखासु हरिद्रा कुंकुमादि सुगंधिद्रव्येणोद्वर्तनम् ॐ अहिरिव भोगैः १ निकामे निकामेति उष्णोदकेन शाखास्नपनम् ॐ निकामे निकामे नः १ दधिक्राव्णोति शाखासु दध्यक्षतावन्दनम् ॐ दधिक्राव्णो॰ अ॰ ॐ या ओषधीरिति यजमानहस्ते शाखाग्रहणम ॐ या ओषधीः॰ १ ततो यजमानपत्न्या हस्ते शाल्मगर्भ पञ्चमी शाखा दत्वा काण्डात्काण्डादिति कण्डनं कार्यम् ॐ का ण्डात्काण्डात्प्ररोहन्ती॰ १ तत आग्नेयादि चतुर्षु मंडपकोणस्तंभेषु क्रमेण चतस्रो मध्ये एका एवं स्थिरो भवेति स्थिरीक रणम् अथवा वंशपात्रमध्ये चतुर्षु कोणेषु चतस्रो मध्ये एका एवं स्थिरीकरणसंप्रदायः ॐ स्थिरो भव वीड्वङ्ग॰ आशुर्भ व वाज्यर्वन् पृथुर्भव सुषदस्त्वमग्नेः पुरीषवाहणः १ तत्रायं क्रमः नन्दिनी नलिनी मैत्रा उमा च पशुवर्द्धिनी अग्नेयादि

अस्मिन्पक्षे कण्डनं न कार्यम् २॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पं॰प॰ क्रमेणैव शाखास्तंभे प्रतिष्ठिताः १ ॐ नन्दिन्यै नमः नन्दिनीमावा॰ ७ ॐ नलिन्यै न॰ नलिनीमा॰ ८ ॐ मैत्रायै॰ मैत्रामा॰
१२ ९ ॐ उमायै॰ उमामा॰ १० पशुवर्द्धिन्यै॰ पशुवर्धिनीमा॰ ११ मनोजूतिरिति प्रतिष्ठाप्य सर्वासां नाम्नैव षोडशोपचारैः पूज
नम् ॐ भूर्भुवः स्वः नन्दिन्यादि मंडपमातृभ्यो नमः आवाहनादि षोडशोपचारैः पूजयेत् अनया पूजया नन्दिन्यादि मं
डपमातरः प्रीयन्ताम् ततो गौर्यादिमातरो वंशपात्रे पीतपटं प्रसार्य तदुपरि कुंकुमादिना लिखित्वा वा तत्पुंजेषु पूगी
फलेषु निवेश्याः तत्रायं क्रमः गौरी पद्मा शची मेधा सावित्री विजया जया देवसेना स्वधा स्वाहा मातरो लोकमातरः १
हृष्टिः पुष्टिस्तथा तुष्टिरात्मनः कुलदेवता गणेशेनाधिका ह्येता वृद्धौ पूज्याश्चतुर्दश १ अत्र चतुर्दशपदसमाहारान्मा
तरो लोकमातर इति सर्वासां विशेषणम् ॐ गणेशाय नमः गणेशमावाहयामि ॐ गौर्यै नमः गौरीमा॰ १२ पद्मायै॰ पद्मा
मा॰ १३ ॐ शच्यै न॰ शचीमा॰ १४ ॐ मेधायै॰ मेधामा॰ १५ ॐ सावित्र्यै॰ सावित्रीमा॰ १६ ॐ विजयायै॰ विजयामा॰ १७ जयायै॰
जयामा॰ १८ देवसेनायै देवसेनामा॰ १९ ॐ स्वधायै न॰ स्वधामा॰ २० स्वाहायै॰ स्वाहामा॰ २१ हृष्ट्यै॰ हृष्टिमा॰ २२ पुष्ट्यै॰ पुष्टि
मा॰ २३ तुष्ट्यै न॰ तुष्टिमा॰ २४ कुलदेवतायै॰ कुलदेवतामा॰ २५ इत्यावाह्य अथ जलमातरः मत्सी कूर्मी च वाराही मांडू राम
की मकरी तथा ग्राहकी क्रौंचकी चैव सप्तैता जलमातरः १ कांस्ये वा ताम्रपात्रे वा प्रभूतजलपूर्णम् तत्र मत्स्यादीन् १२

षोडशमातृपूजनपक्षे ॐ मातृभ्यो नमः मातर एवा लोकमातृभ्यो न॰ लोकमातर एवा इति विशेषः ३॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वाह्य पूजयेज्जलमातृका २ ॐमत्स्यै नमः मत्सीमावाहयामि २६ ॐकूर्म्यै कूर्मीमा २७ ॐवाराह्यै वाराहीमा २८
माण्डुक्यै मांडुकीमा २९ ॐमकर्यै मकरीमा ३० ग्राहक्यै ग्राहकीमा ३१ ॐक्रौंचक्यै क्रौंचकीमा ३२ इत्यावाह्य अथ
स्थलमातरः ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा वाराही च तथेन्द्राणी चामुंडा सप्तमातरः १ ॐब्राह्म्यै ब्राह्मीमा
३३ ॐमाहेश्वर्यै न माहेश्वरीमा ३४ ॐकौमार्यै न कौमारीमा ३५ ब्रैष्णव्यै न वैष्णवीमा ३६ ॐवाराह्यै वाराहीमा ३७ ॐ
इन्द्राण्यै इन्द्राणीमा ३८ ॐ चामुंडायै चामुंडामा ३९ इत्यावाह्य एताः गौर्यादिवत्पूजयेत् अथ द्वारमातरः जयन्ती मंगला
चैव पिंगला दक्षिणो गृहात् आनन्दवर्धिनी वामे महाकाली च निर्गमे १ गृहस्य दक्षिणोभागे तिस्रो लेख्यास्तु मातरः वामभा
गे तथा देवि जयन्त्यादिक्रमेण तु २ ॐजयन्त्यै न जयन्तीमा ४० मंगलायै मंगलामा ४१ पिंगलायै पिंगलामा ४२ इति द्वार
दक्षिणे ॐ आनन्दवर्द्धिन्यै आनन्दवर्धिनीमा ४३ ॐमहाकाल्यै महाकालीमा ४४ इति वामे इत्यावाह्य ततो गौर्यादिव
त् पूर्ण्य गृहमातरः स्थाप्याः कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः कान्तिस्तु मातरः १ ॐ
कीर्त्यै न कीर्तिमा ४५ ॐलक्ष्म्यै लक्ष्मीमा ४६ ॐधृत्यै न धृतिमा ४७ ॐमेधायै मेधामा ४८ पुष्ट्यै न पुष्टिमा ४९ ॐश्रद्धायै
श्रद्धामा ५० क्रियायै क्रियामा ५१ ॐमत्यै न धृतिमावा ५२ ॐबुद्ध्यै न बुद्धिमा ५३ ॐलज्जावपुषे न लज्जावपुषमा ५४ ॐ
शुद्धपीठे गृहाकारम्मण्डलं कुङ्कुमादिना लिखित्वा न द्वारे स्थाप्या इति बोध्यम् ॥४॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पञ्चधारापक्षे श्रद्धासरस्वत्यौ विवाहायान्यासां पूजनमितिज्ञेयम्·८॥

पं०प० शान्त्यैन· शान्तिमा·५५ ॐतुष्ट्यैन· तुष्टिमा·५६ ॐकान्त्यैन· कान्तिमा·५७ इत्यावाह्य अथ घृतमातरः एताः कुड्ये सूर्पे वा।
१३ कुंकुमाक्तेन घृतेन दक्षिणोत्तराः पूर्वाभिमुखा लेख्याः श्रीर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा सरस्वती मांगल्येषु प्रपूज्यन्ते सप्तै
ता घृतमातरः १ ॐश्रियैनमः श्रियमा·५८ ॐलक्ष्म्यैन· लक्ष्मीमा·५९ ॐधृत्यैन· धृतिमा·६० मेधायैन· मेधामा·६१ पुष्ट्यै
न· पुष्टिमा·६२ ॐश्रद्धायैन· श्रद्धामा·६३ ॐसरस्वत्यैनमः सरस्वतीमावाहयामि ६४ इत्यावाह्य एवं षड्विनायकादि घृतमा
तृकान्तं त्र्यंबतुः षष्टिमातृणां स्थापनम् मनोजूतिरितिमंत्रेण प्रतिष्ठाप्य समख्ये देव्याधिपा इतिमंत्रेण सर्वाः षोडशो
पचारैः संपूजयेत् ॐसमख्ये देव्याधियासन्दक्षिणयोरुचस्सासामामः आयुः प्रमोषीर्मोः अहन्तव वीरं विदेयतवदे
वि सन्दृशी १ ततः कुड्ये आवाहितघृतमातृणामुपरिनागवल्लीदलेन गुडयुक्तेन केवलेन वा घृतेनाभितो धारां वसोः प
वित्रमितिमंत्रेण पातयेत् साच प्रत्यगादिः प्राक्संस्था दक्षिणादिरुदक्संस्था वा ॐवसोः पवित्रम् नद्यथा कुड्यलग्ना व
सोर्द्धाराः सप्तधारा घृतेनानुकारयेत्पञ्च धारा वा नातिन्यूनाः कदाचन १ अथायुष्यजपः आयुष्यं वर्चस्यꣳ रायस्पोष
मौद्भिदम् इदꣳ हिरण्यं वर्चस्वज्जैत्रायाविशतादुमाम् १ नतद्रक्षाꣳसि नपिशाचास्तरन्ति देवानामोजः प्रथमज रा०म०
ꣳह्येतत् यो विभर्ति दाक्षायणꣳ हिरण्यꣳ सदेवेषु कृणुते दीर्घमायुः समनुष्येषु कृणुते दीर्घमायुः २ यदाबध्नन्दाक्षाय १३

ॐवसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम् देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः ३॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अविघ्नपूजनादारभ्यायुष्यजपान्तंसर्वकर्म्मेविवाहे उपनयने चूडाकर्णे केशान्तेसीमन्तोन्नयनेचकर्त्तव्यमन्यत्रतुगौर्यादिषोडशमातृणांपूजनंवसोर्द्धाराःपूजनञ्चकृत्वाऽभ्युदयिकश्राद्धंकुर्यादि

णाहिरण्यर्ठं॰शतानीकायसुमनस्यमानाः तन्मऽआबध्नामिशतशारदायायुष्मांजरदष्टिर्यथासम् ३ आयुष्याणिचशा
स्त्रर्थंजप्त्वातत्रसमाहितः षड्भ्यःपितृभ्यस्तदनुभक्त्याश्राद्धमपक्रमात् अथनान्दीश्राद्धम् तत्रकालःमातृश्राद्ध
न्तुपूर्वाण्हेमध्यान्हेपैतृकन्तथा ततोमातामहानाञ्चवृद्धौश्राद्धत्रयंस्मृतमितिहेमाद्र्यादिनिबन्धेउक्तम् तथा अ
लाभेभिन्नकालानांनान्दीश्राद्धत्रयंबुधः पूर्वेद्युर्वैप्रकुर्वीत पूर्वाण्हेमातृपूर्वकमिति वृद्धमनुवचनम् सांकल्पिकेच
समंत्रकावाहनार्घाग्नौकरणपिंडदानविकिराक्षय्यस्वधावाचनप्रश्नेन्येतत्सप्तकंवर्ज्यम् सांकल्पेकृतेनान्दीमु
खेमध्येनकुर्याद्धूतयमुनः राजाभिषेकेकुर्वीततथैवपुत्रजन्मनीति अथसांकल्पिकाभ्युदयिकश्राद्धप्रयोगः श्रा
द्धदेशमागत्याचम्यप्राङ्मुखउदङ्मुखोवोपविशेत् सव्येनसर्वकर्मकर्त्तव्यम् ऋजवएवकुशाःतिलकार्येयवादान
व्याः ॐ अपवित्रःपवित्रोवासर्वावस्थाङ्गतोपिवायःस्मरेत्पुंडरीकाक्षंसबाह्याभ्यन्तरःशुचिः ॐ पुण्डरीकाक्षःपुनातु इ
ति श्राद्धद्रव्याणिसिंचेत् कुशोदकेन ततःकुशयवजलान्यादाय ॐ अद्यामुकगोत्राणांमातृपितामहीप्रपितामही
नाममुकामुक देवीनान्नान्दीमुखीनांतथामुकगोत्राणांपितृपितामहप्रपितामहानाममुकामुकशर्मणांनान्दीमुखा
नान्तथाऽमुकगोत्राणाम्मातामहवृद्धप्रमातामहानाममुकामुकशर्मणांसपत्निकानान्नान्दीमुखानाममुकगोत्रणा
प्रमातामह१

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पं·प· मुकस्यामुककर्मनिमित्तकंसांकल्पिकेनविधिनाभ्युदयिकश्राद्धमहंकरिष्ये इतिसंकल्पंकृत्वा ततोगायत्रीत्रिर्जपेत् स
१४ त्यवसुसंज्ञकाविश्वेदेवानान्दीमुखाइदम्वःपाद्यंपादावनेजनपादप्रक्षालनं वृद्धिःगोत्राःमातृपितामहीप्रपितामह्यो
नांदीमुख्यइदम्वःपाद्यंपादावनेजनम्पादप्रक्षालनम्वृद्धिःगोत्राःपितृपितामहप्रपितामहानान्दीमुखाइदम्वःपाद्यंपादावने
जनम्पादप्रक्षालनम्वृद्धिःद्वितीयगोत्रामातामहप्रमातामह ——— वृद्धप्रमातामहाःसपत्निकानान्दीमुखाइदम्वःपाद्य
म्पादावनेजनम्पादप्रक्षालनम्वृद्धिःसत्यवसुसंज्ञकाविश्वेदेवानान्दीमुखाइदमासनम्वोनमःनांदीश्राद्धेक्षणःक्रीयतांय
थाप्राप्नुवन्तोभवन्तस्तथाप्राप्नुवामःगोत्राःमातृपितामहीप्रपितामह्यःनान्दीमुख्यःइदमासनम्वोनमःनान्दीश्राद्धेक्ष
णःक्रीयतांयथाप्राप्नुवन्त्योभवन्त्यस्तथाप्राप्नुवामःगोत्राःपितृपितामहप्रपितामहानान्दीमुखाइदमासनम्वोनमः
नांदीश्राद्धेक्षणःक्रीयतांयथाप्राप्नुवन्तोभवन्तस्तथाप्राप्नुवामः३ द्वितीयगोत्रामातामहप्रमातृवृद्धप्रमातामहाःसपत्निका
नान्दीमुखाइदमासनम्वोनमःनान्दीश्राद्धेक्षणःक्रीयतांयथाप्राप्नुवन्तोभवन्तस्तथाप्राप्नुतामहवामः४ अत्रापान्तु गंधाःपां
तु असताःपान्तुपुष्पाणिपान्तु सत्यवसुसंज्ञकाविश्वेदेवानान्दीमुखाइदम्वोगन्धाद्यर्चनंस्वाहासम्पद्यन्ताम्वृद्धिः१ गो राम:
त्रामातृपितामहीप्रपितामह्योनान्दीमुख्यइदम्वोगन्धाद्यर्चनंस्वाहासम्पद्यन्ताम्वृद्धिः२ गोत्राःपितृपितामहप्रपिता १४

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

महानान्दीमुखाइदम्वोगन्धाद्यर्च्चनंस्वाहासम्पद्यन्ताम्वृद्धिः ३ द्वितीयगोत्रामातामहप्रमातामहवृद्धप्रमातामहाःस
पत्निकानान्दीमुखाइदंवोगंधाद्यर्च्चनंस्वाहासम्पद्यन्ताम्वृद्धिः ४ सत्यवसुसंज्ञकाविश्वेदेवानान्दीमुखाएतद्वोयुग्म
ब्राह्मणभोजनपर्य्याप्तान्ननिष्क्रयीभूतन्द्रव्यममृतरूपेणस्वाहा सम्पद्यन्ताम्वृद्धिः १ गोत्रामातृपितामहीप्रपिताम
ह्योनान्दीमुख्य एतद्वोयुग्मब्राह्मणभोजनपर्य्याप्तान्ननिष्क्रयीभूतंद्रव्यममृतरूपेणस्वाहासम्पद्यन्ताम्वृद्धिः २ गोत्राःपितृ
पितामहप्रपितामहानान्दीमुखाएतद्वोयुग्मब्राह्मणभोजनपर्य्याप्तान्ननिष्क्रयीभूतन्द्रव्यममृतरूपेणस्वाहासम्पद्यन्ता
म्वृद्धिः ३ द्वितीयगोत्रामातामहप्रमातामहवृद्धप्रमातामहास्सपत्निकानान्दीमुखाएतद्वोयुग्मब्राह्मणभोजनपर्य्याप्तान्न
निष्क्रयीभूतन्द्रव्यममृतरूपेणस्वाहासम्पद्यन्ताम्वृद्धिः ४ क्षीरयवजलानिदद्यात् सत्यवसुसंज्ञकाविश्वेदेवानांदीमुखाः
प्रीयन्ताम् १ गोत्रामातृपितामहीप्रपितामह्योनान्दीमुख्यःप्री० २ गोत्राःपितृपितामहप्रपितामहानान्दीमुखाःप्री० ३ द्वितीय
गोत्रामातामहप्रमातामहवृद्धप्रमातामहाःसपत्निकानान्दीमुखाःप्री० ४ ततऊँगोत्रन्नोवर्द्धतान्दातारोनोऽभिवर्द्धन्ताम्वेदः
संततिरेवच श्रद्धाचनोमाव्यगमद्बहुदेयञ्चनोस्त्विति अन्नञ्चनोबहुभवेदतिथींश्चलभेमहियाचितारश्चनःसन्तुमा
चयाचिष्मकञ्चनएताःसत्याआशिषःसंत्विन्त्याशीःप्रार्थयेत् सत्यवसुसंज्ञकानांविश्वेषान्देवानान्नान्दीमुखानांकृते

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पं॰प॰ नान्दाभ्युदयिकश्राद्धप्रतिष्ठार्थमिदन्द्राक्षामलकयवमूलनिष्क्रयीभूतन्द्रव्यंयथानामगोत्रायब्राह्मणायदक्षिणांदातुम्
१५ हमुत्सृजे गोत्राणाम्मातृपितामहीप्रपितामहीनांनान्दीमुखीनांकृतैतन्नान्दाभ्युदयिकश्राद्धप्रतिष्ठार्थमिदन्द्राक्षामलकयवमू
लनिष्क्रयीभूतन्द्रव्यंयथा २ गोत्राणांपितृपितामहप्रपितामहानांनान्दीमुखानांकृतैतन्नान्दाभ्युदयिकश्राद्धप्रतिष्ठार्थमि
दन्द्राक्षामलकयवमूलनिष्क्रयीभूतन्द्रव्यंयथा ३ द्वितीयगोत्राणाम्मातामहप्रमातामहवृद्धप्रमातामहानांनान्दीमुखा
नांसपत्निकानांकृतैतन्नान्दाभ्युदयिकश्राद्धप्रतिष्ठार्थमिदन्द्राक्षामलकयवमूलनिष्क्रयीभूतन्द्रव्यंयथा ४ ओंउपास्मैगायता
नरः पवमानायेन्दवे अभिदेवाँइयक्षते १ इडामग्ने पुरुदंसंसनिंगोः शश्वत्तमंहवमानायसाध स्यान्नः सूनुस्तनयो
विजावाग्नेसातेसुमतिर्भूत्वस्मे २ वाजेवाजेवतवाजिनोनोधनेषुविप्राऽअमृताऽऋतज्ञाः अस्यमध्वःपिबतमादयध्वन्तृ
प्ता यात पथिभिर्देवयानैः इतिपितृविसर्जनम् ओंविश्वेदेवाःप्रीयन्ताम् इतिदेवविसर्जनम् अस्मिन्नान्दीश्राद्धेन्यूनातिरि
क्तो यो विधिः स उपविष्टब्राह्मणानाम्वचनात्परिपूर्णोऽस्तु अस्तुपरिपूर्णः इतिनान्दीश्राद्धम् शुभार्थीप्सुयमान्तेनवृद्धौसंक
ल्पमात्रेण न षष्ठ्यायदिवाकुर्यात् महान्दोषोभिजायते १ इतिनमन्तव्यम् शाखान्तरत्वादत एव कृष्णद्धरेणापिप्रतिज्ञा राम:
संकल्पोदक्षिणासंकल्पश्चपश्चोक्तः अनस्मकृद्दशब्दानामस्रपाणाम्गोत्रिणाम् अनाम्नामनिलादीशश्चनांदीश्राद्ध स्त्व १५

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

आचार्यस्य दक्षिणजानुं स्पृष्ट्वा पठेदेवं सर्वत्र ब्रह्मादिवरणेष्वपि बोध्यम् १॥

सत्यवत् अथाचार्यादिवरणम् आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः तथा त्वं मम यज्ञेऽस्मिन्नाचार्यो भव सुव्रत १ ॐ बृहस्पते ऽ अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु यद्दीदयच्छवस ऽ ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् १ अमुकगोत्रोत्पन्नोऽमुकप्रवरान्वितोऽमुकशर्मा यजमानोऽहममुकगोत्रोत्पन्नममुकप्रवरान्वितं शुक्लयजुर्वेदान्तर्गतमाध्यन्दिनीयशाखाध्यायिनममुकशर्माणं ब्राह्मणमस्मिन्नमुककर्मण्याचार्यत्वेन त्वामहं वृणे वृतोऽस्मि गन्धादिभिः सम्पूज्य यथा चतुर्मुखो ब्रह्मा सर्वलोकपितामहः तथा त्वं मम यज्ञेऽस्मिन् ब्रह्मा भव द्विजोत्तम १ ब्रह्म यज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन ऽ आवः स बुध्न्या ऽ उपमा ऽ अस्य विष्ठाः सतश्च योनिमसतश्च विवः १ अस्मिन्नमुककर्मणि ब्रह्मत्वेन त्वामहं वृणे वृतोऽस्मि वाञ्छितार्थफलावाप्त्यै पूजितोऽसि सुरासुरैः निर्विघ्नं क्रतुसंसिध्यै त्वामहं गणपं वृणे १ ॐ गणानां त्वा १ अस्मिन्नमुककर्मणि गाणपत्यत्वेन त्वामहं वृणे वृतोऽस्मि कर्मणामुपदेष्टारं सर्वकर्मविदुत्तमम् कर्मिणां वेदतत्त्वज्ञं सदस्यं त्वामहं वृणे १ ॐ सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् सनिं मेधामयासिषं स्वाहा १ अस्मिन्नमुककर्मणि सदस्यत्वेन त्वामहं वृणे वृतोऽस्मि ततश्चतुरो द्वौ वा ऋत्विजो वृणुयात् यज्ञादिकर्मकार्येषु ऋत्विग् शक्रमखे यथा तथा यज्ञादिकार्येऽस्मिन् ऋत्विक् त्वं मे मखे भव १ अस्मिन्न ऋत्विक्त्वेन त्वामहं वृणे वृतोऽस्मि ततः सूक्तजपार्थं ऋग्वेदादीन्वृणुयात् ऋग्वेदः पद्मपत्राक्षो गायत्रः सोमदैवतः अत्रिगोत्रस्तु विप्रेन्द्र ऋ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न्विग्त्वंमेमखेभव१ ॐअग्निमीलेपुरोहितंयज्ञस्यदेवमृत्विजम् होतारंरत्नधातमम् १ अस्मिन्नमुककर्मणिऋत्विक्त्वेन

त्वामहंवृणे वृतोस्मि कानराक्षोयजुर्वेदस्त्रैष्टुभो ब्रह्मदेवतः भारद्वाजस्तुविप्रेंद्रऋत्विक्त्वंमेमखेभव१ ॐइषेत्वोर्जेत्वावा
यवस्थदेवोवःसविताप्रार्पयतुश्रेष्ठतमायकर्मणऽआप्यायध्वमघ्न्याऽइन्द्रायभागम्प्रजावतीरनमीवाऽअयक्ष्मामावस्तेन
ऽईशतमाघशंसोध्रुवाऽअस्मिन्गोपतौस्यातबह्वीर्यजमानस्यपशून्पाहि१ अस्मिन्नमु॰वृणेवृतोस्मिसामवेदस्तुपिं
गाक्षोजागतःशक्रदैवतःकाश्यपेयस्तुविप्रेन्द्रऋत्विक्त्वंमेमखेभव१ ॐअग्नआयाहिवीतयेगृणानोहव्यदातयेनिहो
तासत्सिबर्हिषि१ अस्मिन्नमुक॰वृहन्नेत्रोथर्ववेदोनुष्टुभोरुद्रदैवतःवैखानसकुलोत्पन्नःऋत्विग्त्वं॰१ ॐशन्नोदेवीरभि
ष्टयऽआपोभवन्तुपीतये शंयोरभिस्रवन्तुनः१ अस्मिन्नमुककवृणे वृतोस्मि भगवन्मूर्तिसर्वधर्मभृतांवर विनतेमम
यज्ञेस्मिन्जपार्थेत्वामहंवृणे१ अस्मिन्नमुककर्मणिरुद्रजपार्थेत्वामहं॰ वृतोस्मि ऋत्विजोगंधादिभिः संपूजयेत् य
जमानर्त्विजःपरस्परंयज्ञकंकणंबध्नीयुः ॐव्रतेनदीक्षामाप्नोतिदीक्षयाप्नोतिदक्षिणाम् दक्षिणाश्रद्धामाप्नोतिश्रद्ध
यासत्यमाप्यते एतावद्रूपंयज्ञस्ययद्देवैर्ब्रह्मणाकृतम् तदेतत्सर्वमाप्नोतियज्ञेसौत्रामणीसुते१ अथप्रार्थना१ ब्राह्म
णाःसन्तुमेशस्ताःपापात्पान्तुसमाहिताः देवानांचैवदातारःपातारःसर्वदेहिनाम्१ जपयज्ञैस्तथाहोमैर्दानैश्चविविधैः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पुनः देवाना मनुष्याणां स्वर्गार्थं याजकाः कृताः २ येषान्देहे स्थिता वेदाः पावयन्ति जगत्त्रयम् रक्षन्तु सततं ते मां जपयज्ञे ऽत्र व्यवस्थिताः ३ ब्राह्मणा जंगमन्तीर्थं त्रिषु लोकेषु विश्रुतम् तेषां वाक्योदकेनैव शुध्यन्ति मलिना जनाः ४ पावनाः सर्ववर्णानां ब्राह्मणा ब्रह्मरूपिणः सर्वकर्मरता नित्यं वेदशास्त्रार्थकोविदाः ५ श्रोत्रियाः सत्यवाचश्च ग्रहध्यानरताः सदा यद्वाक्यामृतसंसिक्ता ऋद्धिं यान्ति नरद्रुमाः ६ अंगीकुर्वन्तु कर्मैतत्कल्पद्रुमसमाशिषः यथोक्तनियमैर्युक्ता मन्त्रार्थस्थिरबुद्धयः ७ यत्कृपालोचनात्सर्वा ऋद्धयो वृद्धिमाप्नुयुः अस्मिन्होमे मया पूज्याः सन्तु मे नियमान्विताः ८ अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः ग्रहध्यानरता नित्यं प्रसन्नमनसः सदा ९ अदुष्टभाषणाः सन्तु मा सन्तु परनिंदकाः ममापि नियमा ह्येते भवन्तु भवतामपि १० इति सम्प्रार्थ्य तान्ब्रूयाद्यथावत्क्रियतां विधिः ऋत्विजश्च यथापूर्वं शक्रादीनां मखे भवन् ११ यूयन्तथा मे भवतऋत्विजो द्विजसत्तमाः अस्य यागस्य निष्पत्तौ भवन्तोऽभ्यर्चिता मया १२ सुप्रसन्नैः प्रकर्तव्यं शान्तिकं विधिपूर्वकम् इत्याचार्यादिवरणम् अथ दिग्रक्षणम् तत आचम्य प्राणानायम्य देशकालौ स्मृत्वा अस्मिन्नमुककर्मणि यजमानेन वृतोऽहमाचार्यकर्म करिष्ये तदङ्गशरीरशुध्यर्थं पुरुषसूक्तजपं करिष्ये इति पुरुषसूक्तं षोडशर्चं जपेत् ततआचार्यो वामहस्ते गौरसर्षपान् लाजमिश्रान् गृहीत्वा दिग्रक्षणं कुर्यात् तत्र मंत्राः रक्षोहणम्बलगहनम्वैष्णवीमिदम्

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पं·प· हंतम्वलगमुत्किरामियम्मेनिष्ट्योयममात्योनिचखानेदमहन्तम्वलगमुत्किरामियम्मेसमानोयमसमानोनिचखानेदम्
१७ हन्तम्वलगमुत्किरामियम्मेसबन्धुर्य्यमसबन्धुर्निचखानेदमहन्तम्वलगमुत्किरामियम्मेसजातोयमसजातोनिच
खानोत्कृत्याङ्किरामि १ रक्षोहणोवोवलगहनःप्रोक्षामिवैष्णवान्रक्षोहणोवोवलगहनोवनयामिवैष्णवान्रक्षोह
णोवोवलगहनोवस्तृणामिवैष्णवान्रक्षोहणौवांवलगहनाऽउपदधामिवैष्णवीरक्षोहणौवांवलगहनौपर्यूहामिवैष्णवीवै
ष्णवमसिवैष्णवास्थ २ रक्षसाम्भागोसिनिरस्तꣳरक्षऽइदमहꣳरक्षोभितिष्ठामीदमहꣳरक्षोवबाधऽइदमहꣳरक्षोधमन्तमोनया
मिघृतेनद्यावापृथिवीप्रोर्णुवाथांवायोवेस्तोकानामग्निराज्यस्यवेतुस्वाहास्वाहाकृतेऽऊर्ध्वनभसंमारुतङ्गच्छतम् ३ रक्षोहाविश्व
श्ववर्षणिरभियोनिमयोहतेद्रोणोसधस्थमासदत् ४ अपसर्पन्तुतेभूतायेभूताभूमिसंस्थिताःयेभूताविघ्नकर्तारस्तेनश्यन्तुशिवा
ज्ञया १ अपक्रामन्तुभूतानिपिशाचाःसर्वतोदिशम् सर्वेषामविरोधेनशान्तिकर्मसमारभे २ यदत्रसंस्थितंभूतंस्थानमाश्रित्यस
र्वतःस्थानंत्यक्त्वातुतत्सर्वंयत्रस्थंतत्रगच्छतु भूतप्रेतपिशाचाद्याअपक्रामन्तुराक्षसाःस्थानादस्माद्व्रजन्त्वन्यत्स्वीकरोमिभु
वन्त्विमाम् ४ भूतानिराक्षसावापियत्रतिष्ठन्तिकेनचन तेसर्वेप्यपगच्छन्तुशान्तिन्तुकरोम्यहम् ५ इतिमन्त्रैरीशानादिसर्वदिक्षु रामः
विकिरेत् उदकोस्पर्शः पञ्चाङ्गपद्धतिरेषासर्वकर्म्मोपकारिका शोधिताऽतिप्रयत्नेन बलदेवेन धीमता १ इतिपञ्चाङ्गप १७

॥ ❁ ॥ इतिः समाप्ता ॥ ❁ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri